# Natya Shastra Chapter 14

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૪

## Document Information

Text title : naaTyashaastra adhyaaya 14 vaachikaabhinaye ChandovidhaanaM

File name : natya14.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : February 27, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૪

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ ચતુર્દશોઽધ્યાયઃ
યો વાગભિનયઃ પ્રોક્તો મયા પૂર્વં દ્વિજોત્તમાઃ ।
લક્ષણં તસ્ય વક્ષ્યામિ સ્વરવ્યઞ્જનસમ્ભવમ્ ॥ ૧॥

વાચિ યત્નસ્તુ કર્તવ્યો નાટ્યસ્યેયં તનુઃ સ્મૃતા ।
અઙ્ગનેપથ્યસત્ત્વાનિ વાક્યાર્થં વ્યઞ્જયન્તિ હિ ॥ ૨॥

વાઙ્મયાનીહ શાસ્ત્રાણિ વાઙ્નિષ્ઠાનિ તથૈવ ચ ।
તસ્માદ્વાચઃ પરં નાસ્તિ વાગ્ હિ સર્વસ્ય કારણમ્ ॥ ૩॥

આગમનામાખ્યાતનિપાતોપસર્ગસમાસતદ્ધિતૈર્યુક્તઃ ।
સન્ધિવચનવિભક્ત્યુપગ્રહનિયુક્તો વાચિકાભિનયઃ ॥ ૪॥

દ્વિવિધં હિ સ્મૃતં પાઠ્યં સંસ્કૃતં પ્રાકૃતં તથા ।
તયોર્વિભાગં વક્ષ્યામિ યથાવદનુપૂર્વશઃ ॥ ૫॥

વ્યઞ્જનાનિ સ્વરાશ્ચૈવ સન્ધયોઽથ વિભક્તયઃ ।
નામાખ્યાતોપસર્ગાશ્ચ નિપાતાસ્તદ્ધિતાસ્તથા ॥ ૬॥

એતૈરઙ્ગૈઃ સમાસૈશ્ચ નાનાધાતુસમાશ્રયમ્ ।
વિજ્ઞેયં સંસ્કૃતં પાઠ્યં પ્રયોગઞ્ચ નિબોધત ॥ ૭॥

અકારાદ્યાઃ સ્વરા જ્ઞેયા ઔકારાન્તાશ્ચતુર્દશ ।
હકારાન્તાનિ કાદીનિ વ્યઞ્જનાનિ વિદુર્બુધાઃ ॥ ૮॥

તત્ર સ્વરાશ્ચતુર્દશ - અ આ ઇ ઈ ઉ ઊ ઋ ૠ ૡ ૡ એ ઐ
ઓ ઔ ઇતિ સ્વરા જ્ઞેયાઃ ॥

કાદીનિ વ્યઞ્જનાનિ યથા - ક ખ ગ ઘ ઙ ચ છ જ ઝ

ञ ટ ઠ ડ ઢ ણ ત થ દ ધ ન પ ફ બ ભ મ ય ર લ વ
શ ષ સ હ ઇતિ વ્યઞ્જનવર્ગઃ ।
વર્ગે વર્ગે સમાખ્યાતૌ દ્વૌ વર્ણૌ પ્રાગવસ્થિતૌ ।
અઘોષા ઇતિ યે ત્વન્યે સઘોષાઃ સમ્પ્રકીર્તિતાઃ ॥ ૯॥

અષ્ટૌ સ્થાનાનિ વર્ણાનામુરઃ કણ્ઠઃ શિરસ્તથા ।
જિહ્વામૂલશ્ચ દન્તાશ્ચ નાસિકોષ્ઠૌ ચ તાલુ ચ ॥ ૧૦॥

અ કુ હ વિસર્જનીયાઃ કણ્ઠ્યાઃ । ઇ ચુ ય શાસ્તાલવ્યાઃ ।
ઋ ટુ ર ષા મૂર્ધન્યાઃ । ઌ તુ લ સા દન્ત્યાઃ । ઉ
પૂપધ્માનીયા ઓષ્ઠ્યાઃ । પ ફ ઇતિ પફાભ્યાં પ્રાક્
અર્ધવિસર્ગસદૃશઃ ઉપધ્માનીયઃ । ક ખ ઇતિ કખાભ્યાં
પ્રાક્ અર્ધવિસર્ગસદૃશો જિહ્વમૂલીયઃ । એ ઐ કણ્ઠ્યતાલવ્યૌ ।
ઓ ઔ કણ્ઠ્યોષ્ઠ્યૌ । વકારો દન્ત્યોષ્ઠ્યઃ । ઙ ઞ ણ ન મા
અનુનાસિકાઃ । વિસર્જનીયઃ ઔરસ્યઃ ઇત્યેકે ।
સર્વવર્ણાનાં મુખં સ્થાનમિત્યપરે ।
દ્વૌ દ્વૌ વર્ણૌ તુ વર્ગાદ્યૌ શષસાશ્ચ ત્રયોઽપરે ।
અઘોષા ઘોષવન્તસ્તુ તતોઽન્યે પરિકીર્તિતાઃ ॥ ૧૧॥

એતે ઘોષાઘોષાઃ કણ્ઠયોષ્ઠ્યા દન્ત્યજિહ્વાનુનાસિક્યાઃ ।
ઊષ્માણસ્તાલવ્યાઃ  વિસર્જનીયાશ્ચ બોદ્ધવ્યાઃ ॥ ૧૨॥

ગઘઙ જઝઞ ડઢણ દધન બભમ તથૈવ યરલવા મતા ઘોષાઃ ।
કખ ચછ ટઠ તથ પફ ઇતિ વર્ગેષ્વઘોષાઃ સ્યુઃ ॥ ૧૩॥

કખગઘઙાઃ કણ્ઠસ્થાસ્તાલુસ્થાનાસ્તુ ચછજઝઞાઃ ।
ટઠડઢણા મૂર્ધન્યાસ્તથદધનાશ્ચૈવ દન્તસ્થાઃ ॥ ૧૪॥

પફબભમાસ્ત્વોષ્ઠ્યાઃ સ્યુઃ દન્ત્યા ઌલસા અહૌ ચ કણ્ઠસ્થૌ ।
તાલવ્યા ઇચુયશા સ્યુરૃટુરષા મૂર્ધસ્થિતા જ્ઞેયાઃ ॥ ૧૫॥

ઌૡ દન્ત્યૌ ઓઔ કણ્ઠોષ્ઠ્યૌ એઐકારૌ ચ કણ્ઠતાલવ્યૌ ।
કણ્ઠ્યો વિસર્જનીયો જિહ્વામૂલમુદ્ભવઃ કખયોઃ ॥ ૧૬॥

પફયોરોષ્ઠસ્થાનં ભવેદુકારઃ સ્વરો વિવૃતઃ ।
સ્પૃષ્ટાઃ કાદ્યા માન્તાઃ શષસહકારાસ્તથા વિવૃતાઃ ॥ ૧૭॥

અન્તસ્થાઃ સંવૃતજાઃ ઙઞણનમા નાસિકોદ્ભવા જ્ઞેયાઃ ।

ઊષ્માણશ્ચ શષસહાઃ યરલવવર્ણાસ્તથૈવ ચાન્તઃસ્થાઃ ॥ ૧૮॥

જિહ્વામૂલીયઃ કઃ પ ઉપધ્માનીયસંજ્ઞયા જ્ઞેયઃ ।
કચટતપા સ્વરિતાઃ સ્યુઃ ખછઠથફા સ્યુઃ સદા ક્રમ્યાઃ ॥ ૧૯॥

કણ્ઠ્યોરસ્યાન્ વિદ્યાત્ ઘઝઢધભાન્ પાઠ્યસમ્પ્રયોગે તુ ।
વેદ્યો વિસર્જનીયો જિહ્વાસ્થાને સ્થિતો વર્ણઃ ॥ ૨૦॥

એતે વ્યઞ્જનવર્ણાઃ સમાસતઃ સંજ્ઞયા મયા કથિતાઃ ।
શબ્દવિષયપ્રયોગે સ્વરાઁસ્તુ ભૂયઃ પ્રવક્ષ્યામિ ॥ ૨૧॥

યસ્મિન્ સ્થાને સ સમો વિજ્ઞેયો યઃ સવર્ણસંજ્ઞોઽસૌ ।
ય ઇમે સ્વરાશ્ચતુર્દશ નિર્દિષ્ટાસ્તત્ર વૈ દશ સમાનાઃ ।
પૂર્વો હ્રસ્વઃ તેષાં પરશ્ચ દીર્ઘોઽવગન્તવ્યઃ ॥ ૨૨॥

ઇત્થં વ્યઞ્જનયોગૈઃ સ્વરૈશ્ચ સાખ્યાતનામપદવિહિતૈઃ ।
કાવ્યનિબન્ધાશ્ચ સ્યુર્ધાતુનિપાતોપસર્ગાસ્તુ ॥ ૨૩॥

એભિર્વ્યઞ્જનવર્ગૈર્નામાખ્યાતોપસર્ગનિપાતૈઃ ।
તદ્ધિતસન્ધિવિભક્તિભિરધિષ્ઠિતઃ શબ્દ ઇત્યુક્તઃ ॥ ૨૪॥

પૂર્વાચાર્યૈરુક્તં શબ્દાનાં લક્ષણં સમાસયોગેન ।
વિસ્તરશઃ પુનરેવ પ્રકરણવશાત્ સમ્પ્રવક્ષ્યામિ ॥ ૨૫॥

અર્થપ્રધાનં નામ સ્યાદાખ્યાતં તુ ક્રિયાકૃતમ્ ।
દ્યોતયન્ત્યુપસર્ગાસ્તુ વિશેષં ભાવસંશ્રયમ્ ॥ ૨૬॥

તત્પ્રાહુઃ સપ્તવિધં ષટ્કારકસંયુતં પ્રથિતસાધ્યમ્ ।
નિર્દેશસમ્પ્રદાનાપદાનપ્રભૃતિસંજ્ઞાભિઃ ॥ ૨૭॥

નામાખ્યાતાર્થવિષયં વિશેષં દ્યોતયન્તિ તે ।
પૃથક્તત્રોપસર્ગેભ્યો નિપાતા નિયમેઽચ્યુતે ॥ ૨૮॥

સમ્પ્રત્યતીતકાલક્રિયાદિસંયોજિતં પ્રથિતસાધ્યમ્ ।
વચનં નાગતયુક્તં સુસદૃશસંયોજનવિભક્તમ્ ॥ ૨૯॥

પઞ્ચશતધાતુયુક્તં પઞ્ચગુણં પઞ્ચવિધમિદં વાપિ ।
સ્વાદ્યધિકારગુણૈરર્થવિશેષૈર્વિભૂષિતન્યાસમ્ ।
પ્રાતિપદિકાર્થલિઙ્ગૈર્યુક્તં પઞ્ચવિધમિદં જ્ઞેયમ્ ॥ ૩૦॥

આખ્યાતં પાઠ્યકૃતં જ્ઞેયં નાનાર્થાશ્રયવિશેષમ્ ।

વચનં નામસમેતં પુરુષવિભક્તં તદાખ્યાતમ્ ॥ ૩૧॥

પ્રાતિપદિકાર્થયુક્તાન્ધાત્વર્થાનુપસૃજન્તિ યે સ્વાર્થૈઃ ।
ઉપસર્ગા હ્યુપદિષ્ટાસ્તસ્માત્ સંસ્કારશાસ્ત્રેઽસ્મિન્ ॥ ૩૨॥

પ્રાતિપદિકાર્થયોગાદ્ધાતુચ્છન્દોનિરુક્તયુક્ત્યા ચ ।
યસ્માન્નિપતન્તિ પદે તસ્માત્પ્રોક્તા નિપાતાસ્તુ ॥ ૩૩॥

પ્રત્યયવિભાગજનિતાઃ પ્રકર્ષસંયોગસત્વવચનૈશ્ચ ।
યસ્માત્પૂરયતેઽર્થાન્ પ્રત્યય ઉક્તસ્તતસ્તસ્માત્ ॥ ૩૪॥

લોકે પ્રકૃતિપ્રત્યયવિભાગસંયોગસત્વવચનૈશ્ચ ।
તાંસ્તાન્ પૂરયતેઽર્થાંસ્તેષુ યસ્તદ્ધિતસ્તસ્માત્ ॥ ૩૫॥

એકસ્ય બહૂનાં વા ધાતોર્લિઙ્ગસ્ય વા પદાનાં વા ।
વિભજન્ત્યર્થં યસ્માત્ વિભક્તયસ્તેન તાઃ પ્રોક્તાઃ ॥ ૩૬॥

વિશિષ્ટાસ્તુ સ્વરા યત્ર વ્યઞ્જનં વાપિ યોગતઃ ।
સન્ધીયતે પદે યસ્માત્તસ્માત્ સન્ધિઃ પ્રકીર્તિતઃ ॥ ૩૭॥

વર્ણપદક્રમસિદ્ધઃ પદૈકયોગાચ્ચ વર્ણયોગાચ્ચ ।
સન્ધીયતે ચ યસ્માત્તસ્માત્ સન્ધિઃ સમુદ્દિષ્ટઃ ॥ ૩૮॥

લુપ્તવિભક્તિર્નામ્નામેકાર્થં સંહરત્સમાસોઽપિ ।
તત્પુરુષાદિકસંજ્ઞૈર્નિર્દિષ્ટઃ ષડ્વિધો વિપ્રાઃ ॥ ૩૯॥

એભિઃ શબ્દવિધાનૈર્વિસ્તારવ્યઞ્જનાર્થસંયુક્તૈઃ ।
પદબન્ધાઃ કર્તવ્યા નિબદ્ધબન્ધાસ્તુ ચૂર્ણા વા ॥ ૪૦॥

વિભક્ત્યન્તં પદં જ્ઞેયં નિબદ્ધં ચૂર્ણમેવ ચ ।
તત્ર ચૂર્ણપદસ્યેહ સન્નિબોધત લક્ષણમ્ ॥ ૪૧॥

અનિબદ્ધપદં છન્દોવિધાનાનિયતાક્ષરમ્ ।
અર્થાપેક્ષ્યક્ષરસ્યૂતં જ્ઞેયં ચૂર્ણપદં બુધૈઃ ॥ ૪૨॥

નિબદ્ધાક્ષરસંયુક્તં યતિચ્છેદસમન્વિતમ્ ।
નિબદ્ધં તુ પદં જ્ઞેયં પ્રમાણનિયતાત્મકમ્ ॥ ૪૩॥

એવં નાનાર્થસંયુક્તૈઃ પાદૈર્વર્ણવિભૂષિતૈઃ ।
ચતુર્ભિસ્તુ ભવેદ્યુક્તં છન્દો વૃત્તાભિધાનવત્ ॥ ૪૪॥

ષડ્વિંશતિઃ સ્મૃતાન્યેભિઃ પાદૈશ્છન્દસિ સંખ્યયા ।
સમઞ્ચાર્ધસમઞ્ચૈવ તથા વિષમમેવ ચ ॥ ૪૫॥

છન્દોયુક્તં સમાસેન ત્રિવિધં વૃત્તમિષ્યતે ।
નાનાવૃત્તિવિનિષ્પન્ના શબ્દસ્યૈષા તનૂસ્સ્મૃતા ॥ ૪૬॥

છન્દોહીનો ન શબ્દોઽસ્તિ ન ચ્છન્દશ્શબ્દવર્જિતમ્ ।
તસ્માત્તૂભ્યસંયોગો નાટ્યસ્યોદ્યોતકઃ સ્મૃતઃ ॥ ૪૭॥

એકાક્ષરં ભવેદુક્તમત્યુક્તં દ્વ્યક્ષરં ભવેત્ ।
મધ્યં ત્ર્યક્ષરમિત્યાહુઃ પ્રતિષ્ઠા ચતુરક્ષરા ॥ ૪૮॥

સુપ્રતિષ્ઠા ભવેત્ પઞ્ચ ગાયત્રી ષડ્ ભવેદિહ ।
સપ્તાક્ષરા ભવેદુષ્ણિગષ્ટાક્ષરાનુષ્ટુબુચ્યતે ॥ ૪૯॥

નવાક્ષરા તુ બૃહતી પઙ્ક્તિશ્ચૈવ દશાક્ષરા ।
એકાદશાક્ષરા ત્રિષ્ટુબ્ જગતી દ્વાદશાક્ષરા ॥ ૫૦॥

ત્રયોદશાઽતિજગતી શક્વરી તુ ચતુર્દશા ।
અતિશક્વરી પઞ્ચદશા ષોડશાષ્ટિઃ પ્રકીર્તિતા ॥ ૫૧॥

અત્યષ્ટિઃ સ્યાત્સપ્તદશા ધૃતિરષ્ટાદશાક્ષરા ।
એકોનવિંશતિર્ધૃતિઃ કૃતિર્વિંશતિરેવ ચ ॥ ૫૨॥

પ્રકૃતિશ્ચૈકવિંશત્યા દ્વાવિંશત્યાકૃતિસ્તથા ।
વિકૃતિઃ સ્યાત્ ત્રયોવિંશા ચતુર્વિંશા ચ સંકૃતિઃ ॥ ૫૩॥

પઞ્ચવિંશત્યતિકૃતિઃ ષડ્વિંશત્યુત્કૃતિર્ભવેત્ ।
અતોઽધિકાક્ષરં છન્દો માલાવૃત્તં તદિષ્યતે ॥ ૫૪॥

છન્દસાં તુ તથા હ્યેતે ભેદાઃ પ્રસ્તારયોગતઃ ।
અસંખ્યેયપ્રમાણાનિ વૃત્તાન્યાહુરતો બુધાઃ ॥ ૫૫॥

ગાયત્રીપ્રભૃતિત્ત્વેષાં પ્રમાણં સંવિધીયતે ।
પ્રયોગજાનિ સર્વાણિ પ્રાયશો ન ભવન્તિ હિ ॥ ૫૬॥

વૃત્તાનિ ચ ચતુષ્ષષ્ટિર્ગાયત્ર્યાં કીર્તિતાનિ તુ ।
શતં વિંશતિરષ્ટૌ ચ વૃત્તાન્યુષ્ણિહ્યથોચ્યતે ॥ ૫૭॥

ષટ્પઞ્ચાશચ્છતે દ્વે ચ વૃત્તાનામપ્યનુષ્ટુભિ ।
શતાનિ પઞ્ચ વૃતાનાં બૃહત્યાં દ્વાદશૈવ ચ ॥ ૫૮॥

પઙ્ક્ત્યાં સહસ્રં વૃત્તાનાં ચતુર્વિંશતિરેવ ચ ।
ત્રૈષ્ટુભે દ્વે સહસ્રે ચ ચત્વારિંશત્તથાષ્ટ ચ ॥ ૫૯॥

સહસ્રાણ્યપિ ચત્વારિ નવતિશ્ચ ષડુત્તરા ।
જગત્યાં સમવર્ણાનાં વૃત્તાનામિહ સર્વશઃ ॥ ૬૦॥

અષ્ટૌ સહસ્રાણિ શતં દ્વ્યધિકા નવતિઃ પુનઃ ।
જગત્યામતિપૂર્વાયાં વૃત્તાનાં પરિમાણતઃ ॥ ૬૧॥

શતાનિ ત્રીણ્યશીતિશ્ચ સહસ્રાણ્યપિ ષોડશ ।
વૃત્તાનિ ચૈવ ચત્વારિ શક્વર્યાઃ પરિસંખ્યયા ॥ ૬૨॥

દ્વાત્રિંશચ્ચ સહસ્રાણિ સપ્ત ચૈવ શતાનિ ચ ।
અષ્ટૌ ષષ્ટિશ્ચ વૃત્તાનિ હ્યાશ્રયન્ત્યતિશક્વરીમ્ ॥ ૬૩॥

પઞ્ચષષ્ટિસહસ્રાણિ સહસ્રાર્ધઞ્ચ સંખ્યયા ।
ષટ્ત્રિંશચ્ચૈવ વૃત્તાનિ હ્યષ્ટ્યાં નિગદિતાનિ ચ ॥ ૬૪॥

એકત્રિંશત્સહસ્રાણિ વૃત્તાનાઞ્ચ દ્વિસપ્તતિઃ ।
તથા શતસહસ્રઞ્ચ છન્દાંસ્યત્યષ્ટિસંજ્ઞિતે ॥ ૬૫॥

ધૃત્યામપિ હિ પિણ્ડેન વૃત્તાન્યાકલ્પિતાનિ તુ ।
તજ્જ્ઞૈઃ શતસહસ્રે દ્વે શતમેકં તથૈવ ચ ॥ ૬૬॥

દ્વિષષ્ટિશ્ચ સહસ્રાણિ ચત્વારિંશચ્ચ યોગતઃ ।
ચત્વારિ ચૈવ વૃત્તાનિ સમસંખ્યાશ્રયાણિ તુ ॥ ૬૭॥

અતિધૃત્યાં સહસ્રાણિ ચતુર્વિંશતિરેવ ચ ।
તથા શતસહસ્રાણિ પઞ્ચ વૃત્તશતદ્વયમ્ ॥ ૬૮॥

અષ્ટાશીતિશ્ચ વૃત્તાનિ વૃત્તજ્ઞૈઃ કથિતાનિ ચ ।
કૃતૌ શતસહસ્રાણિ દશ પ્રોક્તાનિ સંખ્યયા ॥ ૬૯॥

ચત્વારિંશત્તથા ચાષ્ટૌ સહસ્રાણિ શતાનિ ચ ।
પઞ્ચષટ્સપ્તતિશ્ચૈવ વૃત્તાનાં પરિમાણતઃ ॥ ૭૦॥

તથા શતસહસ્રાણાં પ્રકૃતૌ વિંશતિર્ભવેત્ ।
સપ્ત વૈ ગદિતાસ્ત્વત્ર નવતિશ્ચૈવ સંખ્યયા ॥ ૭૧॥

સહસ્રાણિ શતં ચૈકં દ્વિપઞ્ચાશત્તથૈવ ચ ।

વૃત્તાનિ પરિમાણેન વૃત્તજ્ઞૈર્ગદિતાનિ તુ ॥ ૭૨॥

ચત્વારિંશત્તથૈકઞ્ચ લક્ષાણામથ સંખ્યયા ।
તથા ચેહ સહસ્રાણિ નવતિશ્ચતુરુત્તરા ॥ ૭૩॥

શતત્રયં સમાખ્યાતં હ્યાકૃત્યાં ચતુરુત્તરમ્ ।
જ્ઞેયા શતસહસ્રાણામશીતિસ્ત્ર્યધિકા બુધૈઃ ॥ ૭૪॥

અષ્ટાશીતિ સહસ્રાણિ વૃત્તાનાં ષટ્ શતાનિ ચ ।
અષ્ટૌ ચૈવ તુ વૃત્તાનિ વિકૃત્યાં ગદિતાનિ તુ ॥ ૭૫॥

તથા શતસહસ્રાણિ સપ્તષષ્ટિશ્ચ સપ્તતિઃ ।
સપ્ત ચૈવ સહસ્રાણિ ષોડશે દ્વે શતે તથા ॥ ૭૬॥

કોટિશ્ચૈવેહ વૃત્તાનિ સંકૃતૌ કથિતાનિ વૈ ।
કોટિત્રયઞ્ચાભિકૃત્યાં પઞ્ચત્રિંશદ્ભિરન્વિતમ્ ॥ ૭૭॥

પઞ્ચાશદ્ભિઃ સહસ્રૈશ્ચ ચતુર્ભિરધિકૈસ્તથા ।
ચતુષ્ટયં શતાનામ્ ચ દ્વાત્રિંશદ્ભિઃ સમન્વિતમ્ ॥ ૭૮॥

ષટ્ કોટયસ્તથોત્કૃત્યાં લક્ષાણામેકસપ્તતિઃ ।
ચતુષ્ષષ્ટિશતાન્યષ્ટૌ સહસ્રાણ્યષ્ટ ચૈવ હિ ॥ ૭૯॥

ઉક્તાદુત્કૃતિપર્યન્તવૃત્તસંખ્યાં વિચક્ષણઃ ।
એતેન ચ વિકલ્પેન વૃત્તેષ્વેતેષુ નિર્દિશેત્ ॥ ૮૦॥

સર્વેષાં છન્દસામેવં વૃત્તાનિ કથિતાનિ વૈ ।
તિસ્રઃ કોટયો દશ તથા સહસ્રાણાં શતાનિ તુ ॥ ૮૧॥

ચત્વારિંશત્તથા દ્વે ચ સહસ્રાણિ દશૈવ તુ ।
સપ્તભિઃ સહિતાન્યેવ સપ્ત ચૈવ શતાનિ ચ ॥ ૮૨॥

ષડ્વિંશતિરિહાન્યાનિ વ્યાખ્યાતાનિ સમાસતઃ ।
સમાનિ ગણનાયુક્તિમાશ્રિત્ય કથિતાનિ વૈ ॥ ૮૩॥

સર્વેષાં છન્દસામેવં ત્રિકૈર્વૃત્તં પ્રયોજયેત્ ।
જ્ઞેયાશ્ચાષ્ટૌ ત્રિકાસ્તત્ર સંજ્ઞાભિઃ સ્થાનમચ્છરમ્ ॥ ૮૪॥

ત્રીણ્યક્ષરાણિ વિજ્ઞેયસ્ત્રિકોઽંશઃ પરિકલ્પિતઃ ।
ગુરુલઘ્વક્ષરકૃતઃ સર્વવૃત્તેષુ નિત્યશઃ ॥ ૮૫॥

ગુરુપૂર્વો ભકારઃ સ્યાન્મકારે તુ ગુરુત્રયમ્ ।
જકારો ગુરુમધ્યસ્થઃ સકારોઽન્ત્યગુરુસ્તથા ॥ ૮૬॥

લઘુમધ્યસ્થિતો રેફસ્તકારોઽન્ત્યલઘુઃ પરઃ ।
લઘુપૂર્વો યકારસ્તુ નકારે તુ લઘુત્રયમ્ ॥ ૮૭॥

એતે હ્યષ્ટૌ ત્રિકાઃ પ્રાજ્ઞૈર્વિજ્ઞેયા બ્રહ્મસમ્ભવાઃ ।
લાઘવાર્થં પુનરમી છન્દોજ્ઞાનમવેક્ષ્ય ચ ॥ ૮૮॥

એભિર્વિનિર્ગતાશ્ચાન્યા જાતયોઽથ સમાદયઃ ।
અસ્વરાઃ સસ્વરાશ્ચૈવ પ્રોચ્યન્તે વૃત્તલક્ષણૈઃ ॥ ૮૯॥

ગુર્વેકં ગિતિ વિજ્ઞેયં તથા લઘુ લિતિ સ્મૃતમ્ ।
નિયતઃ પદવિચ્છેદો યતિરિત્યભિધીયતે ॥ ૯૦॥

ગુરુ દીર્ઘં પ્લુતઞ્ચૈવ સંયોગપરમેવ ચ ।
સાનુસ્વારવિસર્ગં ચ તથાન્ત્યઞ્ચ લઘુ ક્વચિત્ ॥ ૯૧॥

ગાયત્ર્યાં દ્વૌ ત્રિકૌ જ્ઞેયૌ ઉષ્ણિક્ ચૈકાધિકાક્ષરા ।
અનુષ્ટુપ્ દ્વ્યધિકા ચૈવ બૃહત્યાં ચ ત્રિકાસ્ત્રયઃ ॥ ૯૨॥

એકાક્ષરાધિકા પઙ્ક્તિસ્ત્રિષ્ટુપ્ ચ દ્વ્યધિકાક્ષરા ।
ચતુસ્ત્રિકા તુ જગતી સૈકાતિજગતી પુનઃ ॥ ૯૩॥

શક્વરી દ્વ્યધિકા પઞ્ચત્રિકા જ્ઞેયાતિશક્વરી ।
એકાધિકાક્ષરાષ્ટિશ્ચ દ્વ્યધિકાત્યષ્ટિરુચ્યતે ॥ ૯૪॥

ષટ્ત્રિકાસ્તુ ધૃતિઃ પ્રોક્તા સૈકા ચાતિધૃતિસ્તથા ।
કૃતિશ્ચ દ્વ્યધિકા પ્રોક્તા પ્રકૃત્યાં સપ્ત વૈ ત્રિકાઃ ॥ ૯૫॥

આકૃતિસ્ત્વધિકૈકેન દ્વ્યધિકા વિકૃતિસ્તથા ।
અષ્ટત્રિકાઃ સંકૃતૌ સ્યાત્ સૈકા ચાભિકૃતિઃ પુનઃ ॥ ૯૬॥

ઉત્કૃતિર્દ્વ્યધિકા ચૈવ વિજ્ઞેયા ગણમાનતઃ ।
ગુર્વેકં ગ ઇતિ પ્રોક્તં ગુરુણી ગાવિતિ સ્મૃતૌ ।
લઘ્વેકં લ ઇતિ જ્ઞેયં લઘુની લાવિતિ સ્મૃતૌ ॥ ૯૭॥

સમ્પદ્વિરામપાદાશ્ચ દૈવતસ્થાનમક્ષરમ્ ।
વર્ણઃ સ્વરો વિધિર્વૃત્તમિતિ છન્દોગતો વિધિઃ ॥ ૯૮॥

નૈવાતિરિક્તં હીનં વા યત્ર સમ્પદ્યતે ક્રમઃ ।

વિધાને ચ્છન્દસામેષ સમ્પદિત્યભિસંજ્ઞિતઃ ॥ ૯૯॥

યત્રાર્થસ્ય સમાપ્તિઃ સ્યાત્ સ વિરામ ઇતિ સ્મૃતઃ ।
પાદશ્ચ પદ્યતેર્ધાતોશ્ચતુર્ભાગ ઇતિ સ્મૃતઃ ॥ ૧૦૦॥

અગ્ન્યાદિદૈવતં પ્રોક્તં સ્થાનં દ્વિવિધમુચ્યતે ।
શરીરાશ્રયસંભૂતં દિગાશ્રયમથાપિ ચ ॥ ૧૦૧॥

શારીરં મન્ત્રસંભૂતં છન્દો ગાયત્રસંજ્ઞિતમ્ ।
ક્રુષ્ટે મધ્યં દિનં પ્રોક્તં ત્રૈષ્ટુભં પરિકીર્ત્યતે ॥ ૧૦૨॥

તૃતીયસવનઞ્ચાપિ શીર્ષણ્યં જાગતં હિ યત્ ।
હ્રસ્વં દીર્ઘં પ્લુતઞ્ચૈવ ત્રિવિધઞ્ચાક્ષરં સ્મૃતમ્ ॥ ૧૦૩॥

શ્વેતાદયસ્તથા વર્ણા વિજ્ઞેયાશ્છન્દસામિહ ।
તારશ્ચૈવ હિ મન્દ્રશ્ચ મધ્યમસ્ત્રિવિધઃ સ્વરઃ ॥ ૧૦૪॥

ધ્રુવાવિધાને ચૈવાસ્ય સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ।
વિધિર્ગણકૃતશ્ચૈવ તથૈવાર્થકૃતો ભવેત્ ॥ ૧૦૫॥

છન્દતો યસ્ય પાદે સ્યાદ્ધીનં વાઽધિકમેવ વા ।
અક્ષરં નિચૃદિતિ પ્રોક્તં ભૂરિક્ ચેતિ દ્વિજોત્તમાઃ ॥ ૧૦૬॥

અક્ષરાભ્યાં સદા દ્વાભ્યામધિકં હીનમેવ વા ।
તચ્છન્દો નામતો જ્ઞેયં સ્વરાડિતિ વિરાડપિ ॥ ૧૦૭॥

સર્વેષામેવ વૃત્તાનાં તજ્જ્ઞૈર્જ્ઞેયા ગણાસ્ત્રયઃ ।
દિવ્યો દિવ્યેતરશ્ચૈવ દિવ્યમાનુષ એવ ચ ॥ ૧૦૮॥

ગાયત્ર્યુષ્ણિગનુષ્ટુપ્ ચ બૃહતી પઙ્ક્તિરેવ ચ ।
ત્રિષ્ટુપ્ ચ જગતી ચૈવ દિવ્યોઽયં પ્રથમો ગણઃ ॥ ૧૦૯॥

તથાતિજગતી ચૈવ શક્વરી ચાતિશક્વરી ।
અષ્ટિરત્યષ્ટિરપિ ચ ધૃતિશ્ચાતિધૃતિર્ગણઃ ॥ ૧૧૦॥

કૃતિશ્ચ પ્રકૃતિશ્ચૈવ હ્યાકૃતિર્વિકૃતિસ્તથા ।
સંકૃત્યભિકૃતી ચૈવ ઉત્કૃતિર્દિવ્યમાનુષા ॥ ૧૧૧॥

એતેષાં છન્દસાં ભૂયઃ પ્રસ્તારવિધિસંશ્રયમ્ ।
લક્ષણં સમ્પ્રવક્ષ્યામિ નષ્ટમુદ્દિષ્ટમેવ ચ ॥ ૧૧૨॥

પ્રસ્તારોઽક્ષરનિર્દિષ્ટો માત્રોક્તશ્ચ તથૈવ હિ ।
દ્વિકૌ ગ્લાવિતિ વર્ણોક્તૌ મિશ્રૌ ચેત્યપિ માત્રિકૌ ॥ ૧૧૩॥

ગુરોરધસ્તાદાદ્યસ્ય પ્રસ્તારે લઘુ વિન્યસેત્ ।
અગ્રતસ્તુ સમાદેયા ગુરવઃ પૃષ્ઠતસ્તથા ॥ ૧૧૪॥

પ્રથમં ગુરુભિર્વર્ણૈર્લઘુભિસ્ત્વવસાનજમ્ ।
વૃત્તન્તુ સર્વછન્દસ્સુ પ્રસ્તારવિધિરેવ તુ ॥ ૧૧૫॥

ગુર્વધસ્તાલ્લઘું ન્યસ્ય તથા દ્વિદ્વિ યથોદિતમ્ ।
ન્યસ્યેત્ પ્રસ્તારમાર્ગોઽયમક્ષરોક્તસ્તુ નિત્યશઃ ॥ ૧૧૬॥

માત્રાસંખ્યાવિનિર્દિષ્ટો ગણો માત્રાવિકલ્પિતઃ ।
મિશ્રૌ ગ્લાવિતિ વિજ્ઞેયૌ પૃથક્ લક્ષ્યવિભાગતઃ ॥ ૧૧૭॥

માત્રાગણો ગુરુશ્ચૈવ લઘુની ચૈવ લક્ષિતે ।
આર્યાણાં તુ ચતુર્માત્રાપ્રસ્તારઃ પરિકલ્પિતઃ ॥ ૧૧૮॥

ગીતકપ્રભૃતીનાન્તુ પઞ્ચમાત્રો ગણઃ સ્મૃતઃ ।
વૈતાલીયં પુરસ્કૃત્ય ષણ્માત્રાદ્યાસ્તથૈવ ચ ॥ ૧૧૯॥

ત્ર્યક્ષરાસ્તુ ત્રિકા જ્ઞેયા લઘુગુર્વક્ષરાન્વિતાઃ ।
માત્રાગણવિભાગસ્તુ ગુરુલઘ્વક્ષરાશ્રયઃ ॥ ૧૨૦॥

અન્ત્યાદ્ દ્વિગુણિતાદ્રૂપાદ્ દ્વિદ્વિરેકં ગુરોર્ભવેત્ ।
દ્વિગુણાઞ્ચ લઘોઃ કૃત્વા સંખ્યાં પિણ્ડેન યોજયેત્ ॥ ૧૨૧॥

આદ્યં સર્વગુરુ જ્ઞેયં વૃત્તન્તુ સમસંજ્ઞિતમ્ ।
કોશં તુ સર્વલઘ્વન્ત્યં મિશ્રરૂપાણિ સર્વતઃ ॥ ૧૨૨॥

વૃત્તાનાં તુ સમાનાનાં સંખ્યાં સંયોજ્ય તાવતીમ્ ।
રાશ્યૂનામર્ધવિષમાં સમાસાદભિનિર્દિશેત્ ॥ ૧૨૩॥

એકાદિકાં તથા સંખ્યાં છન્દસો વિનિવેશ્ય તુ ।
યાવત્ પૂર્ણન્તુ પૂર્વેણ પૂરયેદુત્તરં ગણમ્ ॥ ૧૨૪॥

સમાનાં વિષમાણાં ચ સંગુણય્ય તથા સ્ફુટમ્ ।
રાશ્યૂનામભિજાનીયાદ્વિષમાણાં સમાસતઃ ॥ ૧૨૫॥

એવં કૃત્વા તુ સર્વેષાં પરેષાં પૂર્વપૂરણમ્ ।
ક્રમાન્નૈધનમેકૈકં પ્રતિલોમં વિસર્જયેત્ ॥ ૧૨૬॥

સર્વેષાં છન્દસામેવં લધ્વક્ષરવિનિશ્ચયમ્ ।
જાનીત સમવૃત્તાનાં સંખ્યાં સંક્ષેપતસ્તથા ॥ ૧૨૭॥

વૃત્તસ્ય પરિમાણન્તુ છિત્વાર્ધેન યથાક્રમમ્ ।
ન્યસેલ્લઘુ યથા સૈકમક્ષરં ગુરુ ચાપ્યથ ॥ ૧૨૮॥

એવં વિન્યસ્ય વૃત્તાનાં નષ્ટોદ્દિષ્ટવિભાગતઃ ।
ગુરુલધ્વક્ષરાણીહ સર્વછન્દસ્સુ દર્શયેત્ ॥ ૧૨૯॥

ઇતિ છન્દાંસિ યાનીહ મયોક્તાનિ દ્વિજોત્તમાઃ ।
વૃત્તાન્યેતેષુ નાટ્યેઽસ્મિન્ પ્રયોજ્યાનિ નિબોધત ॥ ૧૩૦॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે વાચિકાભિનયે છન્દોવિધાનં
નામ ચતુર્દશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

---

*Natya Shastra Chapter 14*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*